# Vasudhaiva Kutumbakam

# वसुधैव कुटुम्बकम्

## Document Information

Text title : Vasudhaiva Kutumbakam

File name : vasudhaivakuTumbakam.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : Kapiladeva Dwivedi

Proofread by : Mandar Mali

Translated by : Mandar Mali

Description/comments : Rashtragitanjali, Kapiladeva Dwivedi (Ed.)

Acknowledge-Permission: Kapiladeva Dwivedi, Vishvabharati Anusandhan Parishad, Varanasi

Latest update : May 1, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# वसुधैव कुटुम्बकम्

(गीतिका) (स्रग्विणी वृत्तम्)
विश्ववन्धुत्व-मन्त्रं सदा गीयतां
विश्व कल्याण-भावं सदा धीयताम् ।
लोक-कल्याण-भावामृतं पीयतां
लोक-शोकाऽऽधि-तापावलिं क्षीयताम् ॥ विश्व० ॥

स्वार्थमूल मतं दीन-सन्तापनं
शोक-मोहादि-मूलं मत नाशनम् ।
स्वार्थ एवास्ति लोकस्य संशोषक
क्लेश हेतुः सदा शान्ति-संरोधक ॥ विश्व० ॥

द्वेष-बुद्धिः सदा ताप-सञ्चारिणी
स्वार्थबुद्धिः सदा शान्ति-संहारिणी ।
भेद-बुद्धिः सदा स्नेह-संहारिणी
लोभ-बुद्धिः सदा दुःख-संसारिणी ॥ विश्व० ॥

विश्वशान्तेः समस्याऽस्ति घोराऽघुना,
राष्टसघं समाधातुकामं सदा ।
विश्वशान्तिं विना नास्ति लोके सुखं
नैव दु खाऽऽधि व्याधिश्च संहारणम् ॥ विश्व० ॥

रागद्वेषावविश्वास-भावोदयो
देश-संशोषणं राष्ट्र संहारणम् ।
स्वाथसिद्धयैः परस्यापि संशोषणं
विश्वशान्तेस्तु संस्थापने रोधकम् ॥ विश्व० ॥

विश्वबन्धुत्व-भावोदयं सौख्यदं,
विश्व-कल्याण भावं सदा मोददम् ।
विश्वबन्धुत्व-भावेन शान्ते सुधा

भ्रातृभावोदयं स्नेह-भावोद्गम् ॥ विश्व० ॥

प्रेममूला सदा सम्पदं सौख्यदा
द्वेषमूला सदैवाऽऽपदो दुःखदा ।
द्वेषनाशो नृणां सौख्य-सञ्चारकं,
शान्ति-संस्थापको राष्ट्र-क्षेमावहम् ॥ विश्व० ॥

वेद-शास्त्रेषु बन्धुत्व भावोद्गमः
सर्वधर्मेषु बन्धुत्व-भावाऽऽश्रयः ।
सार्वभौमा यमा शान्ति-संस्थापकाः
स्नेहदा सौख्यदा भ्रातृभावोदया ॥ विश्व० ॥

यत्र जागर्ति बन्धुत्व-भावावलि
स्नेह-भावोदयो दीन-संरक्षणम् ।
ताप-नाशं क्षुधादेश्च संवारणं
तत्र शान्तिव्यवस्थोन्नतिं सम्पदः ॥ विश्व० ॥

विश्वबन्धुत्व-मन्त्रं सदा श्रेयसे
विश्वबन्धुत्व शक्तिः सदा प्रेयसे ।
विश्वशान्त्यै समद्ध्यै सदा सम्पदे
विश्वबन्धुत्व-भावोद्गतिः सम्मुदे ॥ विश्व० ॥

Proofread by Mandar Mali

*Vasudhaiva Kutumbakam*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*